# APPENDIX - I I

१. आक्षिप्तिका पात्रप्रवेशसूचिका गीतिः । गाथा छन्दः । तल्लक्षणम् पिङ्गले

पटमं वारद मत्ता वीए अट्ठारहेण संजुत्ता ।
जह पटमं तह तीअं दहपञ्च विभुसिआ गाहा ।।

२. जम्भलिका गीतिविशेषः यथा ।

शुद्धा खण्डा च मात्रा च सम्पूर्णे'ति चतुर्विधा ।
भवेद् द्विपदिका गीतिर् भरतेन प्रकीर्तिता ।

भवेच् चतुर्भिश् चरणैस् त्रयोदशकलात्मकैः ।
शुद्धा द्विपदिका गीतिः ; सै'व जम्भलिको'च्यते ।

३. चतुर्दशकलायुक्तैश् चतुर्भिश् चरणैर् इह ।
खण्डाख्या द्विपदीगीतिः, खण्डधारा'पि सा भवेत् ।।

४. दिशोऽवलोक्य पूर्वलक्षितया द्विपदाख्यगीत्या वदती'त्यर्थः । एवं सर्वत्र व्याख्येयम्।

५. चर्चरी गीतिविशेषः, कदाचित् तु रागभेदः ।

६. चर्चरिका गतिविशेषः।

७. भिन्नको रागविशेषः।

८. खण्डको गीतिविशेषो, यथा

पूर्वं चतुर्विंशतिभिर् अष्टाविंशतिभिः परम् ।
मात्राभिर् इह यस्या'र्धं खण्डकः स प्रकीर्त्तितः ।।

९. खुरको नृत्यविशेषः ।

१०. वलन्तिका रागोपाङ्गविशेषः ।

११. वामकं वामाङ्कपार्श्वस्थितवस्त्ववलोकनसंस्थानविशेषः; यद् उक्तम्

धूतेन शिरसा यत् तु पार्श्वेन वलितेन च, ।
तद् वामकं वै करणम्, पार्श्वस्थस्या'वलोकने ।।

१२. ककुभो रागविशेषः। षड् उपभङ्गा अवछेदाः ।

१३. कुटिलिका नाट्यविशेषः ।

१४. मन्दघटी नाट्यविशेषः ।

१५. नृत्यगीतवाद्यानां साम्यं लयम्, तदद्वयान्तरे ।

१६. नन्दावर्तापनामकः संस्थानविशेषो द्विचतुरस्त्रकः; स च द्विवारङ् कृतत्वाद् अर्धद्विंचतुरस्त्रकः; यद् उक्तम्

अस्यै'व चेच् चरणयोर् अन्तरं स्याद् यद् अङगुलम् ।
वितस्तिमात्रम् ,अथवा नन्दावर्तन्, तद् उच्यते ।।

अस्यै' व प्रकृतसंस्थानस्ये' त्य् अर्थः । अयम् एवचा' र्द्धद्विचतुरस्त्रक इत्य् आहु : ।

१७. नन्दावर्तप्रमाणाद् धि भवेद् अष्टादशाङगुलम् ।
अन्तरचतुरैः स्थानञ्, चतुरस्त्रन् तदो' दितम् ।।

१८. रागभेदः ।

१९. स्थानकम् आलापविशेषः ।

२०. खण्डिका गीतिविशेषो गद्यविशेषो वा ।

२१. गलितको नाट्यविशेषः ।